# ॥ महाशिवरात्रि व्रत कथा ॥

लोमश उवाच
आसीत् पुरा महारौद्रश्चण्डो नाम दुरात्मवान् ।
क्रूरसंगो निष्कृतिको भूतानां भयवाहकः ॥ १॥
जालेन मत्स्यान् दुष्टात्मा घातयत्यनिशं खलु ।
भल्लैर्मृगाञ्छ्वापदांश्च कृष्णसारांश्च सल्लकान् ॥ २॥
खड्गांश्चैव च दुष्टात्मा दृष्टवा कांश्चिच्च पापवान् ।
पक्षिणोऽघातयत् क्रुद्धो ब्राह्मणांश्च विशेषतः ॥ ३॥
लुब्धको हि महापापो दुष्टो दुष्जनप्रियः ।
भार्या तथाविधा तस्य पुष्कसस्य महाभया ॥ ४॥
एवं विहरतस्तस्य बहुकालोऽत्यवर्तत ।
गते बहुतिथे काले पापौघनिरतस्य च ॥ ५॥
निषंगे जलमादाय क्षुत्पिपासार्द्दितो भृशम् ।
एकदा निशि पापीयाञ्छ्रीवृक्षोपरि संस्थितः ॥ ६॥
कोलं हन्तुं धनुष्पाणिर्जाग्रच्चानिमिषेण हि ।
माघमासेऽसितायां वै चतुर्दश्यामथाग्रतः ॥ ७॥
मृगमार्गावलोकार्थी बिल्वपत्राण्यपातयत् ॥ ८॥
श्री वृक्षपर्णानि बहूनि तत्र स छेदयामास रूषान्वितोऽपि ।
श्रीवृक्षमूले परिवर्त्तमानो लिंगं च तस्योपरि दुष्टभावः ॥ ९॥
ववर्ष गण्डूषजलं दुरात्मा यदृच्छया तानि शिवे पतन्ति ।
श्रीवृक्षपर्णानि च दैवयोगा- ज्जातं च सर्वं शिवपूजनं
तत् ॥ १०॥
गण्डूषवारिणा तेन स्त्रपनं च कृतं महत् ।
बिल्वपत्रैरसंख्यातैरर्चनं च महत् कृतम् ॥ ११॥
अज्ञानेनापि भो विप्राः पुष्कसेन दुरात्मना ।
माघमासेऽसिते पक्षे चतुर्दश्यां विधूदये ॥ १२॥
पुष्कसोऽथ दुराचारो वृक्षादवततार सः ।
आगत्य जलसंकाशं मत्स्यान् हन्तुं प्रचक्रमे ॥ १३॥
लुब्धकस्यापि भार्याभून्नाम्ना चैव घनोदरी ।
दुष्टासा पापनिरता परद्रव्यापहारिणी ॥ १४॥
गृहान्निर्गत्य सायाह्ने पुरद्वारबहिःस्थिता ।
वनमार्गं प्रपश्यन्ती पत्युरागमनेच्छया ॥ १५॥
चिराद् भर्तरि नायाते चिन्तयामास लुब्धकी ।

अद्य सायाह्नवेलायामागताः सर्वलुब्धकाः ॥ १६ ॥
तमःस्तोमेन संच्छन्नाश्चतस्त्रो विदिशो दिशः ।
रात्रौ यामद्वयं यातं किं मतंगः समागतः ॥ १७ ॥
किं वा केसरलोभेन सिंहेनैव विदारितः ।
किं भुजंगफणारत्नहारी सर्पविषार्दितः ॥ १८ ॥
किं वा वराहद्रंष्ट्राग्रघातैः पञ्चत्वमागः ।
मधुलोभेन वृक्षाग्रात् स वै प्रपतितो भुवि ॥ १९ ॥
का वान्वेषयामि पृच्छामि क्व गच्छामि च कं प्रति ।
एवं विलप्य बहुधा निवृत्ता स्वं गृहं प्रति ॥ २० ॥
नैवान्नं नो जलं किंचिन्न भुक्तं तद्दिने तया ।
चिन्तयन्ती पतिं चापि लुब्धकी त्वनयन्निशाम् ॥ २१ ॥
अथ प्रभाते विमले पुष्कसी वनमाययौ ।
अशनार्थं चल तस्यान्नमादाय त्वरिता सती ॥ २२ ॥
भ्रममाणा वने तस्मिन् ददर्श महतीं नदीम् ।
तस्यास्तीरे समासीनं स्वपतिं प्रेक्ष्य हर्षिता ॥ २३ ॥
तदन्नं कूलतः स्थाप्य नदीं तर्तुं प्रचक्रमे ।
निरीक्ष्य चाथ मत्स्यान् स जालप्रोतान् समानयत् ॥ २४ ॥
तावत् तयोक्तश्चण्डोऽसावेहि शीघ्रं च भक्षय ।
अन्नं त्वदर्थमानीतमुपोष्य दिवसं मया ॥ २५ ॥
कृतं किमद्य रे मन्द गतेऽहनि च किं कृतम् ।
नाशितं च त्वया मूढ लंघितेनाद्य पापिना ॥ २६ ॥
नद्यां स्नात्रौ तथा तौ च दम्पती च शुचिव्रतौ ।
यावद् गतश्च भोक्तुं स तावच्छ्वा स्वयंमागतः ॥ २७ ॥
तेन सर्वं भक्षितं च तदन्नं स्वयमेव हि ।
चण्डी प्रकुपिता चैव श्वानं हन्तुमुपस्थिता ॥ २८ ॥
आवयोर्भक्षितं चान्नमनेनैव च पापिना ।
किं च भक्षयसे मूढ भविताद्य बुभुक्षितः ॥ २९ ॥
एवं तयोक्तश्चण्डोऽसौ बभाषे तां शिवप्रियः ।
यच्छुना भक्षितं चान्नं तेनाहं परितोषितः ॥ ३० ॥
किमनेन शरीरेण नश्वरेण गतायुषा ।
शरीरं दुर्लभं लोके पूज्यते क्षणभंगुरम् ॥ ३१ ॥
ये पुष्णन्ति निजं देहं सर्वभोवेन चाहताः ।
मूढास्ते पापिनो ज्ञेया लोकद्वयबहिष्कृताः ॥ ३२ ॥
तस्मान्मानं परित्यज्य क्रोधं च दुरवग्रहम् ।
स्वस्था भव विमर्शेन तत्त्वबुद्ध्या स्थिरा भव ॥ ३३ ॥
बोधिता तेन चण्डी सा पुष्कसेन तदा भृशम् ।

जागरादि च सम्प्राप्तः पुष्कसोऽपि चतुर्दशीम् ॥ ३४॥
शिवरात्रिप्रसंगाच्च जायते यद्धृद्यसंशयम् ।
तज्ज्ञानं परमं प्राप्तः शिवरात्रिप्रसंगतः ॥ ३५॥
यामद्वयं च संजातममावस्यां तु तत्र वै ।
आगताश्च गणास्तत्र बहवः शिवनोदिताः ॥ ३६॥
विमानानि बहून्यत्र आगतानि तदन्तिकम् ।
दृष्टानितेन तान्येव विमानानि गणास्तथा ॥ ३७॥
उवाच परया भक्त्या पुष्कसोऽपि च तान् प्रति ।
कस्मात् समागता यूयं सर्वे रूद्राक्षधारिणः ॥ ३८॥
विमानस्थाश्च केचिच्च वृषारूढाश्च केचन ।
सर्वे स्फटिकसंकाशाः सर्वे चंद्रार्धशेखराः ॥ ३९॥
कपर्दिनश्चर्मपरीतवाससो भुजंगभोगैः कृतहारभूषणाः ।
श्रियान्विता रूद्रसमानवीर्या यथातथं भो वदतात्मनोचितम् ॥ ४०॥
पुष्कसेन तदा पृष्टा ऊचुः सर्वे च पार्षदाः ।
रूद्रस्य देवदेवस्य संनम्राः कमलेक्षणाः ॥ ४१॥
गणा ऊचु
प्रेषिताःस्मो वयं चण्ड शिवेन परमेष्ठिना ।
आगच्छा त्वरितो भूत्वा सस्त्रीको यानमारूह ॥ ४२॥
लिंगर्चनं कृतं यच्च त्वया रात्रौ शिवस्य च ।
तेन कर्मविपाकेन प्राप्तोऽसि शिवसंनिधिम् ॥ ४३॥
तथोक्तो वीरभद्रेण उवाच प्रहसन्निव ।
पुष्कसोऽपि स्वयं बुद्धद्या प्रस्तावसदृशं वचः ॥ ४४॥
पुष्कस उवाच
किं मया कृतमद्यैव पापिना हिंसकेन च ।
मृगयारसिकेनैव पुष्कसेन दुरात्मना ॥ ४५॥
पापाचारो ह्यहं नित्यं कथं स्वर्गं व्रजाम्यहम् ।
कथं लिंगार्चनमिदं कृतमस्ति तदुच्यताम् ॥ ४६॥
परं कौतुकमापन्नः पृच्छामि त्वां यथातथम् ।
कथयस्व महाभाग सर्वं चैव यथाविधि ॥ ४७॥
वीरभद्र उवाच
देवदेवो महादेवो देवानां पतिरीश्वरः ।
परितुष्टोऽद्य हे चण्ड स महेश उमापतिः ॥ ४८॥
प्रसंगिकतया माघे कृतं लिंगार्चनं त्वया ।
शिवतुष्टिकरं चाद्य पूतोऽसि त्वं न संशयः ॥ ४९॥
शिवरात्र्यां प्रसंगेन कृतमर्चनमेव च ।
कोलं निरीक्षमाणेन बिल्वपत्राणि चैव हि ॥ ५०॥

छेदितानि त्वया चण्ड पतितानि तदैव हि ।
लिंगस्य मस्तके तानि तेन त्वं सुकृती प्रभो ॥ ५१॥
ततश्च जागरो जातो महान् वृक्षोपरि ध्रुवम् ।
तेनैव जागरेणैव तुतोष जगदीश्वरः ॥ ५२॥
छलेनैव महाभाग कोलसंदर्शनेन हि ।
शिवरात्रिदिने चात्र स्वप्नस्ते न च योषितः ॥ ५३॥
तेनोपवासेन च जागरेण तुष्टो ह्यसौ देववरो महात्मा ।
तव प्रसादाय महानुभावो ददाति सर्वान् वरदो महांश्च ॥ ५४॥
एवमुक्तस्तदा तेन वीरभद्रेण धीमता ।
पुष्कसोऽपि विमानाग्र्यमारूरोह च पश्यताम् ॥ ५५॥
गणानां देवतानां च सर्वेषां प्राणिनामपि ।
तदा दुन्दुभयो नेदुर्भेर्यस्तूर्याण्यनेकशः ॥ ५६॥
वीणावेणुमृदंगानि तस्य चाग्रे गतानि च ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ५७॥
शिवसांनिध्यमगमच्चण्डोऽसौ तेन कर्मणा ।
शिरात्र्युपवासेन परं स्थानमुपागमत् ॥ ५८॥
पुष्कसोऽपि तथा प्राप्तः प्रसंगेन सदाशिवम् ।
किं पुनः श्रद्धया युक्ताः शिवाय परमात्मने ॥ ५९॥
पुष्पादिकं फलं गन्धं ताम्बूलं भक्ष्यमृद्धिमत् ।
ये प्रयच्छन्ति लोकेऽस्मिन् रूद्रास्ते नात्र संशयः ॥ ६०॥
ऋषय ऊचुः
किं फलं तस्य चोद्देशः केनैव च पुरा कृतम् ।
कस्माद् व्रतमिदं जातं कृतं केन पुरा विभो ॥ ६१॥
लोमश उवाच
यदा सृष्टं जगत् सर्वं ब्रह्मणा परमेष्ठिना ।
कालचक्रं तदा जातं पुरा राशिसमन्वितम् ॥ ६२॥
द्वादश राशयस्तत्र नक्षत्राणि तथैव च ।
सप्तविंशतिसंख्यानि मुख्यानि कार्यसिद्धये ॥ ६३॥
एभिः सर्वं प्रचण्डं च राशिभिरूडुभिस्तथा ।
कालचक्रान्वितः कालः क्रीडयन् सृजते जगत् ॥ ६४॥
आब्रह्मस्तम्बपर्यन्तं सृजत्यवति हन्ति च ।
निबद्धमस्ति तैएनैव कालेनैकेन भो द्विजाः ॥ ६५॥
कालो हि बलवाँल्लोके एक एव न चापरः ।
भगतस्मात् कालात्मकं सर्वमिदं नास्त्यत्र संशयः ॥ ६६॥
आदौ कालः कालनाच्च लोकनायकनायकः ।
ततो लोका हि संजाताः सृष्टिश्च तदनन्तरम् ॥ ६७॥

सृष्टेर्लवो हि संजातो लवाच्च क्षणमेव च ।
क्षणाच्च निमिषं जातं प्राणिनां हि निरंतरम् ॥ ६८॥
निमिषाणां च षष्ट्या वै पल इत्यभिधीयते ।
पलैस्तु षष्टिभिश्चैव घटिकैकाभिजायते ॥ ६९॥
घटिकानां हि षष्ट्या वै अहोरात्रेति कथ्यते ।
पञ्चदश्या अहोरात्रैः पक्ष इत्यभिधीयते ॥ ७०॥
पक्षाभ्यां मास एव स्यान्मासा द्वादश वत्सरः ।
तं कालं ज्ञातुकामेन कार्यं ज्ञानं विचक्षणैः ॥ ७१॥
प्रतिपद्दिनमारभ्य पौर्णमास्यन्तमेव च ।
पक्षः पूर्णो हि यस्माच्च पूर्णिमेत्यभिधीयते ॥ ७२॥
नष्टस्तु चन्द्रो यस्यां वै अमा सा कत्रता बुधैः ।
अग्निष्वात्तादिपितृणां प्रियातीव बभूव ह ॥ ७३॥
त्रिंशद्दिनानि ह्येतानि पुण्यकालयुतानि च ।
तेषां मध्ये विशेषो यस्तं शृणुध्वं द्विजोत्तमाः ॥ ७४॥
योगानां वा व्यतीपात उडूनां श्रवणस्तथा ।
अमावस्या तिथीनां च पूर्णिमा वै तथैव च ॥ ७५॥
संक्रान्तयस्तथा ज्ञेयाः पवित्रा दानकर्मणि ।
तथाष्टमी प्रिया शम्भोर्गणेशस्य चतुर्थिका ॥ ७६॥
पञ्चमी नागराजस्य कुमारस्य च षष्ठिका ।
भानोश्च सप्तमी ज्ञेया नवमी चण्डिकाप्रिया ॥ ७७॥
ब्रह्मणो दशमी ज्ञेया रूद्रस्यैकादशी तथा ।
विष्णुप्रिया द्वादशी च अन्तकस्य त्रयोदशी ॥ ७८॥
चतुर्दशी तथा शम्भोः प्रिया नास्त्यत्र संशयः ।
निशीथसंयुता या तु कृष्णपक्षे चतुर्दशी ॥ ७९॥
उपोष्या सा तिथिः श्रेष्ठा शिवसायुज्यकारिणी ।
शिवरात्रीति विख्याता सर्वपापप्रणाशिनी ॥ ८०॥
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणी विधवा काचित् पुरा ह्यासीच्च चञ्चला ॥ ८१॥
श्वपचाभिरता सा च कामुकी कामहेतुतः ।
तस्यां तस्य सुतो जातः श्वपचस्य दुरात्मनः ॥ ८२॥
दुःसहो दुष्टनामात्मा सर्वधर्मबहिष्कृतः ।
कितवश्च सुरापायी स्तेयीच गुरूतल्पगः ॥ ८३॥
मृगयुश्च दुरात्मासौ कर्मचाण्डाल एव सः ।
अर्धमिष्ठो ह्यसद्वृत्तः कदाचिच्च शिवालयम् ॥ ८४॥
शिवरात्र्यां च सम्प्राप्तो ह्युषितः शिवसंनिधौ ।
श्रवणं शैवशास्त्रस्य यदृच्छाजातमन्तिके ॥ ८५॥

तेन कर्मविपाकेन पुण्यां योनिमवाप्तवान् ।
भुक्त्वा पुण्यतमाँल्लोकानुषित्वा शाश्वतीः समाः ॥ ८६॥
चित्रांगदस्य पुत्रोऽभूद् भूपालेश्वरलक्षणः ।
नाम्ना विचित्रवीर्योऽसौ सुभगः सुन्दरीप्रियः ॥ ८७॥
राज्यं महत्तरं प्राप्य निःस्तम्भो हि महानभूत् ।
शिवे भक्तिं प्रकुर्वाणः शिवकर्मपरोऽभवत् ॥ ८८॥
शैवशास्त्रं पुरस्कृत्य शिवपूजनतत्परः ।
रात्रौ जागरणं यत्नात् करोति शिवसंनिधौ ॥ ८९॥
शिवस्य गाथां गायंस्तु आनन्दाश्रुकणान् मुहूः ।
प्रमुञ्चंश्चैव नेत्राभ्यां रोमाञ्चपुलकावृतः ॥ ९०॥
आयुष्यं च गतं तस्य शिवध्यानपरस्य च ।
शिवो हि शुलभो लोके पशूनां ज्ञानिनामपि ॥ ९१॥
संसेवितंउ सुखप्राप्त्यै ह्येक एव सदाशिवः ।
शिवरात्र युपवासेन प्राप्तो ज्ञानमनुत्तमम् । ॥ ९२॥
ज्ञानात् सर्वमनुप्राप्तं भूतसाम्यं निरन्तरम् ।
विना शिवेन यत् किंचिन्नास्ति वस्त्वत्र न क्वचित् ॥ ९३॥
प्राप्तज्ञानस्तदा राजा जातो हि शिववल्लभः ।
मुक्ति सायुज्यतां प्राप्तः शिवरात्रेरूपोषणात् ॥ ९४॥
तेन लब्ध शिवाज्जन्म पुरा यत् कथितं मया ।
दाक्षायणी वियोगाच्च जटाजूटेन विस्तरात् ॥ ९५॥
वीरभद्रेति विख्यातो दक्षयज्ञविनाशनः ।
य उत्पन्नो मस्तकाच्च शिवस्य परमात्मनः ॥ ९६॥
शिवरात्रिव्रतेनैव तारिता बहवः पुरा ।
प्राप्ताः सिद्धिं पुरा विप्रा भरताद्याश्च देहिनः ॥ ९७॥
मान्धाता धुन्धुमारश्च हरिश्चन्द्रादयो नृपाः ।
प्राप्ताः सिद्धिमनेनैव व्रतेन परमेण हि ॥ ९८॥
शिवरात्रिसमं नास्ति व्रतं पापक्षयावहम् ।
यत् कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ९९॥
उपवासंकरिष्यन्ति जागरेण समन्वितम् ।
यथोक्तशास्त्रमार्गेण तेषां मोक्षो न संशयः ॥ १००॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
प्राप्नोति तत् फलं सर्वं नात्र कार्या विचारणा ॥ १०१॥
॥ इति श्रीस्कन्दमहापुराणे माहेश्वरखण्डे केदारखण्डे
शिवरात्रिव्रतकथा समाप्तः ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001